श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीपराशरभट्टार्यैरनुगृहीतम्

# ॥ श्रीरङ्गनाथ तिरुमञ्जनकट्टियम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरङ्गनाथ तिरुमञ्जनकट्टियम् ॥

श्रीपराशर भट्टार्यः श्रीरङ्गेशपुरोहितः।
श्रीवत्साङ्कसुतः श्रीमान् श्रेयसे मेऽस्तु भूयसे॥

अमृतप्रभवं प्रभाप्रभाव प्रहतध्वान्तलसद्विलासजातम्।
सकलं सकलानुमोदहेतुं शशिनं त्वां कलयामि रङ्गराज !॥ 1 ॥

अनिशं कुमुदं विकासयन्तं
सततं पूर्णमहर्निशं च दृश्यम्।
अनुपप्लवमद्य रङ्गराजं मनुते
चन्द्रमसं जनोऽनुमान्यम्॥ 2 ॥

कुङ्कुमारुणमुदञ्चित श्रियं
कोमलारुण सरोजसंस्थितम्।
रङ्गमन्दिर ! तमोनिवारणं
शङ्कते तपनदीधितिं जनः॥ 3 ॥

भवन्तं श्रीमन्तं हसितकलिकालङ्कृतमिह
अशोकं कुर्वन्तं भ्रमरहितं अत्युत्सवकरम्।
सुखस्पर्शाश्लिष्यत्पवनजमहानन्द भरितं
वसन्तं रङ्गेशं ! प्रकटसुमनस्कं मनुमहे॥ 4 ॥

सत्पक्षपातात् भुवनाश्रयत्वात्
सन्मानसावास निबन्धनत्वात्।
पद्माश्रयत्वाच्च भवानिदानीं
हंसो यथा राजति रङ्गराज !॥ 5 ॥

अन्तरिस्थितस्सुमनसां अमरेशरत्न
    च्छाया विकल्पितरुचिर्नयनाभिरामम्।
आपातितस्मरगुणः प्रथितप्रचारः
    शाखासु रङ्गनृपतिर्मधुपो विभाति॥ 6॥

सार्धं द्विजैः श्रावणकर्म रङ्गिन्
    कल्पोचितस्नान विधिं करोषि।
श्रुतिस्मृतिभ्यां व्यपदिश्यमानं
    स्वयं ममाज्ञां अनुवर्तयामि॥ 7॥

समुन्मिषत्पद्मजतार संश्रिता
    तवावतारक्रम पाठतत्परा।
त्रयीव रङ्गेश ! समर्थ्यते जनैः
    असौ जयन्तीत्युदितेयमष्टमी॥ 8॥

अमृतमयमनन्तं सिद्धसर्वार्थजातं
    नियमितसकलार्थं निश्चितात्मावबोधम्।
किमिह बहु निरुक्तैः कीर्तनाभीष्टदं त्वां
    निगममिव मनोज्ञं रङ्गराजाद्य मन्ये॥ 9॥

श्यामाभं मकुटोपेतं कटकाञ्चितमुन्नतम्।
सत्त्वाश्रयं रङ्गराजं महीधरमवैम्यहम्॥ 10॥

सत्त्वोन्नतस्सकल सत्त्व निवासभूमिः
    सौवर्णरम्य विभवस्सुमनो मनोज्ञः।
सद्वृत्तसङ्ग समधिष्ठित पार्श्वदेशः
    शैलात्मना स्फुरसि रङ्गमहीश्वर ! त्वम्॥ 11॥

अशेषाशापूर्तिं विदधतमनेकैः स्वविभवैः
    प्रसिद्यत्कल्याणं प्रकटतर पीताम्बर रुचिम्।

कृतस्वास्थ्योत्सेधात् निखिलसुमनः प्रीतिजननं
भवन्तं मन्येऽहं सुरशिखरिणं रङ्गनृपते ! ॥ **12** ॥

मरकतमणिरम्यं रम्यमाणिक्यमुक्ता
फलविलसितगात्रं प्रस्फुरद्गन्धवाहम्।
विहितविविधजन्तुं प्रोल्लसन्मीनलीलं
सुगमजलनिधिं त्वां मन्महे रङ्गराज ! ॥ **13** ॥

मणिवररुचिवाही मत्स्यरूपं दधानो
ललितधवळशङ्खो लङ्घयन्नेव वेलाम्।
विधृतभुवनभारो वीक्ष्यसे रङ्गधामन्
अपर इव वपुष्मानापगानामधीशः ॥ **14** ॥

नानानुवृत्ति विषयं नतराजहंसं
नानाण्डजात समधिष्ठितमब्जरम्यम्।
सेवावतीर्ण सुमरुद्गणमद्य रङ्गिन् !
भावानुरूप नदमित्यनुमन्महे त्वाम् ॥ **15** ॥

वृत्तिर्वेगवती समाश्रितजनत्राणे भवच्चेतसः
ताम्रा कुङ्कुमपत्रिका भुजतटी ते तुङ्गभद्रोज्ज्वला।
रङ्गाधीश्वर ! नर्मदा च भणितिः शोणस्सुजातोऽधरः
तस्मात् स्नान विधौ जनो हि मनुते त्वां सर्वतीर्थात्मकम् ॥ **16** ॥

अनेकशाखाश्रितमाश्रितेभ्यो
दत्ताधिकांशं त्रिदशैकभोग्यम्।
सुपर्णरम्यं सुमनस्समेतं
सुरद्रुमं त्वां सुधियो वदन्ति ॥ **17** ॥

श्रीमत् सुरङ्गधरणीश ! विशालशाखं
श्रीकौस्तुभस्फुरितमीप्सितदानदक्षम्।

हंसादि सद्द्विज वरैरुपसेव्यमानं
त्वां मन्महे सुरतरुं सुरनाथनाथ ॥ 18 ॥

अद्यायते लसति हल्लकपुष्पमाला
वक्षस्स्थले विनिहिता तव रङ्गराज !।
स्वच्छन्दवारि कमलाचरणारविन्द -
माणिक्यनूपुर मयूख परंपरेव ॥ 19 ॥

रङ्गेश ! रजनीचर्चा राजते तव वक्षसि।
देव्या हिरण्यवर्णायाः देहकान्तिरिवोत्थिता ॥ 20 ॥

सर्वस्मात्पर ! सांपरायसवने शक्तिस्तवेच्छात्मिका
पत्नी पात्रगणश्च हेतिपतयः प्राप्तर्त्विजो बाहवः।
पौलस्त्याः पशवो दशाननमुखाः रक्षाफलं ज्ञानिनां
श्रीमन् ! मज्जनकैतवादवभृथस्नातेव रङ्गेश्वर ! ॥ 21 ॥

क्रियादर्शे दर्शे कृतमखविधीनामुपगते
प्रवृत्तस्नानांस्त्वं परमुदयसे रङ्गतरणे।
प्रकर्षेणोद्बुद्ध द्विजकुलमशेषं प्रतिदिशं
प्रहृष्टा पद्मोर्वी भवति च जगत् ध्वस्ततिमिरम् ॥ 22 ॥

चन्द्रार्कौ रङ्गधामन् ! श्रवणमुपागतौ चक्षुराकारयोगात्
मान्योऽमा सङ्गमस्ते सदसि बहुमतो मित्रवारस्य योगः।
कालोऽयं पुष्यदिष्टो भवति मयि महांस्त्वत्कटाक्षस्य पातः
त्वत्कान्त्यब्धेश्च सेतुस्त्वमसि वयमिह प्राप्ततीर्था भवामः ॥ 23 ॥

पद्माविद्युदलङ्कृताङ्गविभवं गंभीरनादाश्रयं
सान्द्रेन्द्रोपलकान्तिचोरवपुषं सन्तापविध्वंसिनम्।

कारुण्याम्बुभराश्रयं विदधतं सच्चातकानां मुदं
मान्यं मेघममोघपूर्णफलदं रङ्गाधिपं मन्महे ॥ 24 ॥

त्वं मेऽहं मे कुतस्तत्तदपि कुत इदं वेदमूल प्रमाणात्
एतच्चानादि सिद्धादनुभव विभवात् तर्हि साक्रोश एव।
क्वाक्रोशः कस्य गीतादिषु मम विदितः कोऽत्र साक्षी सुधीस्स्यात्
हन्त त्वत्पक्षपाती स इति नृकलहे मृग्यमध्यस्थवत् त्वम् ॥ 25 ॥

उत्तरीयपटिका विराजते रङ्गराज ! भवतो भुजान्तरे।
सत्पथे शतमखोपलप्रभे जाह्नवीव शरदभ्रनिर्मला ॥ 26 ॥

पश्यत्सुरासुरगणं सुमनोविकास -
सत्सिद्धचारणसमूह निषेव्यमाणम्।
संदृष्टचारुतर सारतरामृतौघं
त्वां रङ्गराज ! कलयामि हि मन्दराद्रिम् ॥ 27 ॥

॥ इति श्रीरङ्गनाथ तिरुमञ्जनकट्टियं समाप्तम् ॥